# tattvasamAsasUtravRittiH

# તત્ત્વસમાસસૂત્રવૃત્તિઃ

## Document Information

Text title : tattvasamAsasUtravRtti

File name : tattvasamAsasUtravRtti.itx

Category : sUtra, major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# તત્ત્વસમાસસૂત્રવૃત્તિઃ

પઞ્ચવિંશતિતત્ત્વેષુ જન્મના જ્ઞાનમાપ્તવાન્ ।
આદિસૃષ્ટૌ નમસ્તસ્મૈ કપિલાય મહર્ષયે ॥ ૧ ॥

અથાતસ્તત્ત્વસમાસાખ્યસાઙ્ખ્યસૂત્રાણિ વ્યાખ્યાસ્યામઃ । ઇહ કશ્ચિદ્બ્રાહ્મણસ્ત્રિવિધેન દુઃખેનાભિભૂતઃ સાઙ્ખ્યાચાર્યં કપિલમહર્ષિં શરણમુપાગતઃ । સ્વકુલનામગોત્રસ્વાધ્યાયં નિવેદ્યાહ । ભગવન્ કિમિહ પરં કિં યાથાતથ્યં કિં કૃત્વા કૃતકૃત્યઃ સ્યામિતિ । કપિલ ઉવાચ કથયિષ્યામિ । અષ્ટૌ પ્રકૃતયઃ ॥ ૧ ॥ ષોડશ વિકારાઃ ॥ ૨ ॥

પુરુષઃ ॥ ૩ ॥ ત્રૈગુણ્યમ્ ॥ ૪ ॥ સઞ્ચરઃ ॥ ૫ ॥ પ્રતિસઞ્ચરઃ ॥

૬ ॥ અધ્યાત્મમ્ અધિભૂતમ્ અધિદૈવતં ચ ॥ ૭ ॥ પઞ્ચાભિબુદ્ધયઃ ॥

૮ ॥ પઞ્ચકર્મયોનયઃ ॥ ૯ ॥ પઞ્ચવાયવઃ ॥ ૧૦ ॥ પઞ્ચકર્માત્માનઃ ॥ ૧૧ ॥ પઞ્ચપર્વાઽવિદ્યા ॥ ૧૨ ॥ અષ્ટાવિંશતિધાઽશક્તિઃ ॥ ૧૩ ॥

નવધા તુષ્ટિઃ ॥ ૧૪ ॥ અષ્ટધા સિદ્ધિઃ ॥ ૧૫ ॥ દશધા મૂલિકાર્થાઃ ॥

૧૬ ॥ અનુગ્રહસર્ગઃ ॥ ૧૭ ॥ ચતુર્દશવિધો ભૂતસર્ગઃ ॥ ૧૮ ॥ ત્રિવિધો ધાતુસર્ગઃ ॥ ૧૯ ॥ ત્રિવિધો બન્ધઃ ॥ ૨૦ ॥ ત્રિવિધો મોક્ષઃ ॥ ૨૧ ॥

ત્રિવિધં પ્રમાણમ્ ॥ ૨૨ ॥ ત્રિવિધં દુઃખમ્ ॥ ૨૩ ॥ એતત્ પરમ્પરયા યાથાતથ્યમેતત્ સમ્યગ્ જ્ઞાત્વા કૃતકૃત્યઃ સ્યાન્ન પુનસ્ત્રિવિધેન દુઃખેનાભિભૂયતે । ઇતિ તત્ત્વસમાસાખ્યસાઙ્ખ્યસૂત્રાણિ ॥

અથ કા અષ્ટૌ પ્રકૃતય ઇત્યત્રોચ્યતે । અવ્યક્તં બુદ્ધિરહઙ્કારઃ પઞ્ચ તન્માત્રાણીત્યેતા અષ્ટૌ પ્રકૃતયઃ । તત્રાવ્યક્તં તાવદુચ્યતે યથા લોકે વ્યજ્યન્તે ઘટપટકુડ્યશયનકાદ્યા ન તથા વ્યજ્યત ઇત્યવ્યક્તમ્ । શ્રોત્રાદિભિરિન્દ્રિયૈર્ન ગૃહ્યત ઇત્યર્થઃ । કસ્માત્ અનાદિમધ્યાન્તત્વાન્નિરવયવત્વાચ્ચ ॥

અશબ્દમસ્પર્શમરૂપમવ્યયં
તથા ચ નિત્યં રસગન્ધવર્જિતમ્ ।
અનાદિમધ્યં મહતઃ પરં ધ્રુવં
પ્રધાનમેતત્ પ્રવદન્તિ સૂરયઃ ॥

સૂક્ષ્મમલિઙ્ગમચેતનમનાદિનિધનં તથાપ્રસવધર્મિ નિરવયવમેકમેવ
હિ સાધારણમેતદવ્યક્તમ્ । અવ્યક્તસ્યામી પર્યાયશબ્દા ભવન્તિ । અવ્યક્તં
પ્રધાનં બ્રહ્મ પરં ધ્રુવં બહુધાનકમક્ષરં ક્ષેત્રં તમઃપ્રસૂતમિતિ ।
કા બુદ્ધિરત્રોચ્યતે । અધ્યવસાયો બુદ્ધિઃ । સોયમધ્યવસાયો ગવાદિષુ
દ્રવ્યેષુ યસ્માત્ પ્રતિપત્તિઃ । એવમેતન્નાન્યથા । ગૌરેવાયં નાશ્વઃ ।
સ્થાણુરેવાયં ન પુરુષઃ । ઇત્યેષા બુદ્ધિઃ । અસ્યાસ્તુ બુદ્ધેરષ્ટૌ
રૂપાણિ ભવન્તિ ધર્મો જ્ઞાનં વૈરાગ્યમૈશ્વર્યમિતિ । તત્ર
ધર્મો નામાધર્મવિપર્યયઃ શ્રુતિસ્મૃતિવિહિતઃ શિષ્ટાચારાવિરુદ્ધઃ
શુભલક્ષણઃ । જ્ઞાનં નામાજ્ઞાનવિપર્યયસ્તત્ત્વભાવભૂતાનાં સમ્બોધઃ ।
વૈરાગ્યં નામાવૈરાગ્યવિપર્યયઃ શબ્દાદિવિષયેષ્વપ્રસક્તિઃ । ઐશ્વર્યં
નામાનૈશ્વર્યવિપર્યયોઽણિમાદયોઽષ્ટગુણાઃ । એતાનિ સાત્ત્વિકાનિ ચત્વારિ ।
અધર્મોઽજ્ઞાનમવૈરાગ્યમનૈશ્વર્યમિતિ અધર્મો નામ ધર્મવિપર્યયઃ
શ્રુતિસ્મૃતિવિરુદ્ધઃ શિષ્ટાચારવિરુદ્ધોઽશુભલક્ષણઃ । અજ્ઞાનં
નામ જ્ઞાનવિપર્યયસ્તત્ત્વભાવભૂતાનામનવબોધઃ । અવૈરાગ્યં
નામ વૈરાગ્યવિપર્યઃ શબ્દાદિવિષયેષ્વભિષઙ્ગઃ । અનૈશ્વર્યં
નામૈશ્વર્યવિપર્યયોઽણિમાદિરહિતત્વમ્ । એતાનિ તામસાનિ ચત્વારિ । તત્ર
ધર્મેણ નિમિત્તેનોર્ધ્વગમનમ્ । જ્ઞાનેન નિમિત્તેન મોક્ષઃ । વૈરાગ્યેણ
નિમિત્તેન પ્રકૃતિલયઃ । ઐશ્વર્યનિમિત્તેનાઽપ્રતિહતગતિર્ભવતિ ।
એવમેષાષ્ટરૂપા બુદ્ધિર્વ્યાખ્યાતા । બુદ્ધેરમી પર્યાયશબ્દા ભવન્તિ ।
મનો મતિર્મહાન્ બ્રહ્મા ખ્યાતિઃ પ્રજ્ઞા શ્રુતિર્ધૃતિઃ ।
પ્રજ્ઞાનં સન્તતિઃ સ્મૃતિર્ધીર્બુદ્ધિઃ પરિકથ્યતે ॥

અત્રાહ કોઽહઙ્કાર ઇત્યુચ્યતે । અભિમાનોઽહઙ્કારઃ ।
અહં શબ્દે અહં સ્પર્શે અહં રૂપે અહં રસે ।
અહં ગન્ધે અહં સ્વામી ધનવાનહમીશ્વરઃ ॥ ૧॥

અહં ભોગી અહં ધર્મેઽભિષિક્તોઽસૌ મયા હતઃ ।
અહં હનિષ્યે બલિભિઃ પરૈરિત્યેવમાદિકઃ ॥ ૨॥

યોઽયમભિમાનપ્રત્યયો સોઽહઙ્કારઃ । અહઙ્કારસ્યાઽમી પર્યાયશબ્દાઃ ।
અહઙ્કારો વૈકારિકસ્તૈજસો ભૂતાદિઃ સાનુમાનો નિરનુમાનશ્ચેતિ ॥

અત્રાહ કાનિ પઞ્ચતન્માત્રાણીત્યુચ્યતે । અહઙ્કારાન્વિતાનિ પઞ્ચતન્માત્રાણિ શબ્દતન્માત્રં સ્પર્શતન્માત્રં રૂપતન્માત્રં રસતન્માત્રં ગન્ધતન્માત્રં ચેતિ પઞ્ચતન્માત્રાણિ । તત્ર તાવચ્છબ્દતન્માત્રાણિ શબ્દેષ્વેવોપલભ્યન્તે ઉદાત્તાનુદાત્તસ્વરિતકમ્પિતષડ્જર્ષભગાન્ધારમધ્યમપઞ્ચમધૈવતનિષાદાદયઃ શબ્દવિશેષાદુપલભ્યન્તે । તસ્માચ્છબ્દતન્માત્રેઽવિશેષઃ । અથ સ્પર્શતન્માત્રાણિ સ્પર્શેષ્વેવોપલભ્યન્તે તત્ર મૃદુકઠિનકર્કશપિચ્છિલશીતોષ્ણાદયઃ સ્પર્શવિશેષા ઉપલભ્યન્તે । તસ્માત્ સ્પર્શતન્માત્રેઽવિશેષઃ । રૂપતન્માત્રાણિ રૂપેષ્વેવોપલભ્યન્તે । તત્ર શુક્લરક્તકૃષ્ણહરિતપીતહારિદ્રમાઞ્જિષ્ઠાદયો રૂપવિશેષા ઉપલભ્યન્તે । તસ્માદ્રૂપતન્માત્રેઽવિશેષઃ । તથા રસતન્માત્રાણિ રસેષ્વેવોપલભ્યન્તે । તત્ર કટુતિક્તકષાયક્ષારમધુરામ્લલવણાદયો રસવિશેષા ઉપલભ્યન્તે । તસ્માદ્રસતન્માત્રેઽવિશેષઃ । અથ ગન્ધતન્માત્રાણિ ગન્ધ એવોપલભ્યન્તે । તત્ર સુરભિરસુરભિશ્ચ ગન્ધવિશેષા ઉપલભ્યન્તે । તસ્માદ્ ગન્ધતન્માત્રેઽવિશેષઃ । એવમેતત્પઞ્ચતન્માત્રાણિ સૂચિતાનિ । અથૈષાં પર્યાયશબ્દાઃ । તન્માત્રાણ્યવિશેષાણિ મહાભૂતપ્રકૃતયો ભોગ્યાન્યણવઃ શાન્તઘોરમૂઢાનીતિ । એવમેતા અવ્યક્તબુદ્ધ્યહંકારતન્માત્રસઞ્જ્ઞિતા અષ્ટૌ પ્રકૃતયો વ્યાખ્યાતાઃ । અથ કસ્માત્ પ્રકૃતયઃ । પ્રકુર્વન્તીતિ પ્રકૃતયઃ । અથ તે કે ષોડશવિકારા ઇત્યત્રોચ્યતે । એકાદશેન્દ્રિયાણિ પઞ્ચમહાભૂતાન્યેતે ષોડશવિકારાઃ । તત્રેન્દ્રિયાણિ તાવદુચ્યન્તે । શ્રોત્રં ત્વક્ ચક્ષુષી જિહ્વા ઘ્રાણમિતિ પઞ્ચ બુદ્ધીન્દ્રિયાણિ । શ્રોત્રં સ્વવિષયં શબ્દં ગૃહ્ણાતિ ત્વક્સ્પર્શવિષયં ચક્ષૂ રૂપવિષયં રસના રસવિષયં ઘ્રાણં ગન્ધવિષયમિતિ । વાક્પાણિપાદપાયૂપસ્થાખ્યાનિ પઞ્ચ કર્મેન્દ્રિયાણિ સ્વં સ્વં કર્મ કુર્વન્તિ । તત્ર વાગ્વચનમુચ્ચરતિ । હસ્તૌ કર્મ કુરુતઃ । પાદૌ વિહરણમ્ । પાયુર્વિસર્ગમ્ । ઉપસ્થમાનન્દમ્ । ઉભયાત્મકં મનઃ । સ્વસંકલ્પવિકલ્પવૃત્તી કુરુતે । એવનેકાદશેન્દ્રિયાણિ વ્યાખ્યાતાનિ । અથૈષાં પર્યાયાઃ । ઇન્દ્રિયાણિ કરણાનિ વૈકારિકાણિ ખાનિ નિયતાનિ પદાનિ અવધૃતાનિ અણૂનિ અક્ષાણીતિ । અથ કાનિ પઞ્ચમહાભૂતાનીત્યત્રોચ્યતે । પૃથિવ્યપ્તેજોવાય્વાકાશાનીતિ

મહાભૂતાનિ । તત્ર પૃથિવી ધારણભાવેન પ્રવર્તમાના ચતુર્ણામુપકારં કરોતિ । આપો જલાનિ સંગ્રહભાવેન પ્રવર્ત્તમાનાશ્ચતુર્ણામુપકારં કુર્વન્તિ । તેજઃ પાચકભાવેન પ્રવર્તમાનં ચતુર્ણામુપકારં કરોતિ । વાયુર્વાહનભાવેન પ્રવર્તમાનશ્ચતુર્ણામુપકારં કરોતિ । આકાશમવકાશદાનેન પ્રવર્તમાનં ચતુર્ણામુપકારં કરોતિ । શબ્દસ્પર્શરૂપરસગન્ધવતી પઞ્ચગુણા પૃથિવી । શબ્દસ્પર્શરૂપરસવત્યશ્ચતુર્ગુણા આપઃ । શબ્દસ્પર્શરૂપવત્ ત્રિગુણં તેજઃ । શબ્દસ્પર્શવાન્ દ્વિગુણો વાયુઃ । શબ્દવદેકગુણમાકાશમ્ । એવમાખ્યાતાનિ પઞ્ચ મહાભૂતાનિ । અથૈષાં પર્યાયાઃ । ભૂતાનિ ભૂતવિશેષાઃ વિકારાઃ આકૃતયઃ તનવઃ વિગ્રહાઃ શાન્તાઃ ઘોરાઃ મૂઢાઃ ઇત્યેતે ષોડશવિકારા વ્યાખ્યાતાઃ ।

અથાહ કઃ પુરુષ ઇત્યુચ્યતે । પુરુષોઽનાદિઃ સૂક્ષ્મઃ સર્વગતશ્ચેતનોઽગુણો નિત્યો દ્રષ્ટા ભોક્તાઽકર્ત્તા ક્ષેત્રવિદમલોઽપ્રસવધર્મી ચેતિ । અથાહ કસ્માત્ પુરુષઃ પુરાણાત્ પુરિશયનાત્ પુરોહિતવૃત્તિત્વાચ્ચ પુરુષઃ । અથ કસ્માદનાદિઃ । નાસ્યાદિરન્તો મધ્યો વા વિદ્યત ઇત્યનાદિઃ । કસ્માત્ સૂક્ષ્મઃ । નિરવયવત્વાદતીન્દ્રિયત્વાત્ સૂક્ષ્મઃ । કસ્માત્ સર્વગતઃ । સર્વં પ્રાપ્તમનેન નાસ્ય ગગનમસ્તીતિ સર્વગતઃ । કસ્માચ્ચેતનઃ । સુખદુઃકમોહોપલબ્ધિમત્ત્વાત્ । કસ્માદગુણઃ । સત્ત્વરજસ્તમાંસ્યસ્મિન્ન સન્ત્યતોઽગુણઃ । કસ્માન્નિત્યઃ અકૃતકત્વાદનુત્પાદકત્વાચ્ચ । કસ્માદ્ દ્રષ્ટા । પ્રકૃતિવિકારાનુપલમ્ભેન ઇતિ । કસ્માદ્ભોક્તા । ચેતનભાવાત્ સુખદુઃખપરિજ્ઞાનાચ્ચ । કસ્માદકર્તા । ઉદાસીનત્વાદગુણત્વાચ્ચ । કસ્માત્ ક્ષેત્રવિદ્ । ક્ષેત્રેભ્યો ગુણાન્ વેત્તીતિ ક્ષેત્રવિદ્ । અથ કસ્માદમલઃ । શુભાશુભકર્માણ્યસ્મિન્ પુરુષે ન સન્તીત્યમલઃ । કસ્માદપ્રસવધર્મી । નિર્બીજત્વાત્ । ન કિઞ્ચિદુત્પાદયતીત્યર્થઃ । એવમેષ સાંખ્યપુરુષો વ્યાખ્યાતઃ । અથાસ્ય પુરુષસ્ય પર્યાયાઃ । પુરુષઃ આત્મા પુમાન્ પુંગુણઃ બહુલઃ જન્તુઃ જીવઃ ક્ષેત્રજ્ઞઃ નરઃ કવિઃ બ્રહ્મ અક્ષરઃ પ્રાણઃ અજઃ યઃ કઃ સઃ એષઃ । એવમેતાનિ પઞ્ચવિંશતિતત્ત્વાનિ વ્યાખ્યાતાનિ । અષ્ટૌ પ્રકૃતયઃ ષોડશવિકારાઃ પુરુષશ્ચેતિ ॥

પઞ્ચવિંશતિતત્ત્વજ્ઞો યત્ર કુત્રાશ્રમે રતઃ ।
જટી મુણ્ડી શિખી વાપિ મુચ્યતે નાત્ર સંશયઃ ॥

અત્રાહ પુરુષઃ કિં કર્તા અકર્ત્તા વેતિ । યદિ કર્ત્તા પુરુષઃ સ્યાત્ તદા શુભાનિ કુર્યાત્ । નનુ વૃત્તિત્રયં લોકે દૃષ્ટં પુરુષસ્ય તતઃ કિં ગુણાનાં કર્તૃતાઽસિદ્ધા ?

ધર્માખ્યં સૌહિત્યં યમનિયમનિષેવણં પ્રખ્યાનમ્ ।
જ્ઞાનૈશ્વર્યવિરાગાઃ પ્રકાશનમિતિ સાત્ત્વિકી વૃત્તિઃ ॥

રાગઃ ક્રોધો લોભઃ પરપરિવાદોઽતિરૌદ્રતાઽતુષ્ટિઃ ।
વિકૃતાકૃતિપારુષ્યં પ્રખ્યાતૈષા તુ રાજસી વૃત્તિઃ ॥

પ્રમાદમદવિષાદા નાસ્તિક્યં સ્ત્રીપ્રસઙ્ગિતા નિદ્રા ।
આલસ્યં નૈર્ઘૃણ્યમશૌચમિતિ તામસી વૃત્તિઃ ॥

એતદ્વૃત્તિત્રયં દૃષ્ટ્વા લોકે ગુણાનાં કર્તૃત્વં સિદ્ધમિતિ ચાકર્ત્તા પુરુષઃ સિદ્ધો ભવતિ ॥

પ્રવર્ત્તમાનાન્ પ્રકૃતેરિમાન્ ગુણાન્
રજસ્તમોભ્યાં વિપરીતદર્શનાત્ ।
અહં કરોમીત્યબુધોઽભિમન્યતે
તૃણસ્ય કુબ્જીકરણેઽપ્યનીશ્વરઃ ॥

સર્વમિદં મયા કૃતં મમેદમિતિ વદન્નભિમાનાદબુધ ઉન્મત્તઃ કર્તૃવદ્ભવતિ અત્રાહ ।
પ્રકૃતેઃ ક્રિયમાણાનિ ગુણૈઃ કર્માણિ સર્વશઃ ।
અહઙ્કારવિમૂઢાત્મા કર્તાહમિતિ મન્યતે ॥

અનાદિત્વાન્નિર્ગુણત્વાત્ પરમાત્માઽયમવ્યયઃ ।
શરીરસ્થોઽપિ કૌન્તેય ન કરોતિ ન લિપ્યતે ॥

એવમ્ ।
પ્રકૃત્યૈવ ચ કર્માણિ ક્રિયમાણાનિ સર્વશઃ ।
યઃ પશ્યતિ તથાત્માનમકર્તારં સ પશ્યતિ ॥

તત્રાહ કિમયમેકઃ પુરુષો બહવો વેત્યુચ્યતે ।
સુખદુઃખમોહસઙ્કરવિશુદ્ધકરણપાટવજન્મમરણકરણાનાં નાનાત્વાત્ પુરુષબહુત્વં સિદ્ધં લોકાશ્રમવર્ણભેદાચ્ચ । યદ્યેકઃ પુરુષઃ સ્યાદેકસ્મિન્ સુખિનિ સર્વ એવ સુખિનઃ સ્યુઃ । એકસ્મિન્ દુઃખિનિ સર્વ એવ દુઃખિનઃ સ્યુઃ । એકસ્મિન્ કરણપાટવે સર્વેષામેવ

કરણપાટવં સ્યાત્ । એકસ્મિઞ્જાતે સર્વ એવ જાયેરન્ । એકસ્મિન્ મૃતે સર્વ એવ મ્રિયેરન્નિતિ । ન ચૈવમ્ ઇતશ્ચ બહવઃ પુરુષાઃ સિદ્ધાઃ । આકૃતિગર્ભાશયભાવસઙ્ગતિશરીરવિભાગે લિઙ્ગબહુત્વાત્ । એવં તાવત્ સાંખ્યાચાર્યાઃ કપિલાસુરિપઞ્ચશિખપતઞ્જલિપ્રભૃતયો બહૂન્ પુરુષાન્ વર્ણયન્તિ । વેદાન્તવાદિન આચાર્યા હરિહરહિરણ્યગર્ભવ્યાસાદય એકમેવાત્માનં વર્ણયન્તિ । કસ્માદેવં તદાહ ।

પુરુષ એવેદં સર્વં ભૂતં યચ્ચ ભાવ્યમ્ ।
ઉતામૃતત્વસ્યેશાનો યદન્યેનાતિરોહતિ ॥

તદેવાગ્નિસ્તદાદિત્યસ્તદ્વાયુસ્તદ્ધિ ચન્દ્રમાઃ ।
તદેવ શુક્રં તદ્બ્રહ્મ તદાપઃ સઃ પ્રજાપતિઃ ॥

તદેવ સત્યમમૃતં સ મોક્ષઃ સા પરા ગતિઃ ॥

તદક્ષરં તત્ સવિતુર્વરેણ્યં
યસ્માત્પરં નાપરમસ્તિ કિઞ્ચિત્ ॥

યસ્માન્નાણીયો ન જ્યાયોઽસ્તિ કશ્ચિદ્ વૃક્ષ ઇવ સ્તબ્ધો દિવિ
તિષ્ઠત્યેકસ્તેનેદં પૂર્ણં પુરુષેણ સર્વમ્ ।
સર્વતઃ પાણિપાદાન્તં સર્વતોક્ષિશિરોમુખમ્ ।
સર્વતઃ શ્રુતિમલ્લોકે સર્વમાવૃત્ત્ય તિષ્ઠતિ ॥

સર્વેન્દ્રિયગુણાભાસં સર્વેન્દ્રિયવિવર્જિતમ્ ।
સર્વેષાં પ્રભુમીશાનં સર્વસ્ય શરણં મહત્ ॥

સર્વતઃ સર્વતત્ત્વાનિ સર્વાત્મા સર્વસમ્ભવઃ ।
સર્વં વિલીયતે યસ્મિન્ તદ્બ્રહ્મ મુનયો વિદુઃ ॥

એક એવ હિ ભૂતાત્મા દેહે દેહે વ્યવસ્થિતઃ ।
એકધા બહુધા ચૈવ દૃશ્યતે જલચન્દ્રવત્ ॥

સ હિ સર્વેષુ ભૂતેષુ સ્થાવરેષુ ચરેષુ ચ ।
વસત્યેકો મહાનાત્મા યેન સર્વમિદં તતમ્ ॥

એકોયમાત્મા જગતામેકેન બહુધા કૃતઃ ।
પૃથગ્ વદન્તિ ચાત્માનં જ્ઞાનાદિકપ્રવર્તને ॥

બ્રાહ્મણે કૃમિકીટેષુ શ્વપાકે શુનિ હસ્તિનિ ।
પશુગોદંશમશકે સમં પશ્યન્તિ પણ્ડિતાઃ ॥

એક એવ યથા સૂત્રં સુવર્ણે વર્તતે પુનઃ ।
મુક્તામણિપ્રવાલેષુ મૃણ્મયે રજતે તથા ॥

તદ્વદ્ ગોષુ મનુષ્યેષુ તદ્વદ્ધસ્તિમૃગાદિષુ ।
એકોયમાત્મા વિજ્ઞેયઃ સર્વત્રૈવ વ્યવસ્થિતઃ ॥

અત્રાહ કિં ત્રૈગુણ્યં નામોચ્યતે ।
સત્ત્વરજસ્તમાંસીતિ ત્રિગુણા એવ ત્રૈગુણ્યમ્ । સત્ત્વં નામ
પ્રસાદલાઘવપ્રસન્નતાભિષઙ્ગપ્રીતિતુષ્ટિતિતિક્ષાસન્તોષાદિલક્ષણમનન્તભેદં
સમાસતઃ સુખાત્મકમ્ । રજો નામ
શોકતાપસ્વેદસ્તમ્ભોદ્વેગરોષમાનાદિલક્ષણમનન્તભેદં
સમાસતો દુઃખાત્મકમ્ । તમો
નામાઽઽચ્છાદનાવરણબીભત્સદૈન્યગૌરવાલસ્યનિદ્રાપ્રમાદાદિલક્ષણમનન્તભેદં
સમાસતો મોહાત્મકમ્ । એતત્ ત્રૈગુણ્યં વ્યાખ્યાતમ્ ।
સત્ત્વં પ્રકાશકં વિદ્યાદ્રજો વિદ્યાત્ પ્રવર્તકમ્ ।
તમોઽપ્રકાશકં વિદ્યાત્ત્રૈગુણ્યન્નામ સંજ્ઞિતમ્ ॥

અત્રાહ કઃ સઞ્ચરઃ પ્રતિસઞ્ચરશ્ચ । અત્રોચ્યતે । ઉત્પત્તિઃ સઞ્ચરઃ
પ્રલયઃ પ્રતિસઞ્ચરઃ । તત્રોત્પત્તિર્નામાવ્યક્તાત્ પ્રાગુપદિષ્ટાત્
સર્વતઃ પુરુષેણ પરેણાધિષ્ઠિતા બુદ્ધિરુત્પદ્યતે । અષ્ટગુણા
બુદ્ધિઃ । બુદ્ધિતત્ત્વાદહઙ્કાર ઉત્પદ્યતે । સ ચાહંકારસ્ત્રિવિધો
વૈકારિકસ્તૈજસો ભૂતાદિરિતિ । તત્ર વૈકારિકાદહંકારાદેવ ઇન્દ્રિયાણિ
ચોત્પદ્યન્તે । ભૂતાદેસ્તન્માત્રાણિ । તૈજસાદુભયમ્ । તન્માત્રેભ્યો
ભૂતાનીતિ સઞ્ચરઃ । પ્રતિસઞ્ચરો નામ ભૂતાનિ તન્માત્રેષુ લીયન્તે ।
તન્માત્રાણીન્દ્રિયાણિ ચાહંકારે । અહંકારો બુદ્ધૌ । બુદ્ધિરવ્યક્તે ।
તદવ્યક્તં ક્વચિન્ન લીયતે । કસ્માદનુત્પદ્યમાનત્વાત્ પ્રકૃતિં
પુરુષઞ્ચૈવ વિદ્ધ્યનાદિ ઇત્યેવં પ્રતિસઞ્ચરો વ્યાખ્યાતઃ ।
તત્રાહ કિં તદધ્યાત્મમધિભૂતમધિદૈવતં ચેતિ । તત્રોચ્યતે ।
બુદ્ધિરધ્યાત્મમ્ બોદ્ધવ્યમધિભૂતં બ્રહ્મા તત્રાધિદૈવતમ્ ।
અહંકારોઽધ્યાત્મં મન્તવ્યમધિભૂતં રુદ્રસ્તત્રાધિદૈવતમ્ ।
મનોઽધ્યાત્મં સંકલ્પિતવ્યમધિભૂતં ચન્દ્રસ્તત્રાધિદૈવતમ્ ।
શ્રોત્રમધ્યાત્મં શ્રોતવ્યમધિભૂતમાકાશસ્તત્રાધિદૈવતમ્ ।
ત્વગધ્યાત્મં સ્પર્શયિતવ્યમધિભૂતં વાયુસ્તત્રાધિદૈવતમ્ ।

ચક્ષુરધ્યાત્મં દ્રષ્ટવ્યમધિભૂતમાદિત્યસ્તત્રાધિદૈવતમ્ ।
જિહ્વાધ્યાત્મં રસયિતવ્યમધિભૂતં વરુણસ્તત્રાધિદૈવતમ્ ।
ઘ્રાણમધ્યાત્મં ઘ્રાતવ્યમધિભૂતં પૃથ્વી તત્રાધિદૈવતમ્ ।
વાગધ્યાત્મં વક્તવ્યમધિભૂતં અગ્નિસ્તત્રાધિદૈવતમ્ ।
પાણી અધ્યાત્મં ગ્રહીતવ્યમધિભૂતમિન્દ્રસ્તત્રાધિદૈવતમ્ ।
પાદાવાધ્યાત્મં ગન્તવ્યમધિભૂતં વિષ્ણુસ્તત્રાધિદૈવતમ્ ।
પાયુરધ્યાત્મમુત્સ્રષ્ટવ્યમધિભૂતં મિત્રસ્તત્રાધિદૈવતમ્ ।
ઉપસ્થમધ્યાત્મમાનન્દયિતવ્યમધિભૂતં પ્રજાપતિસ્તત્રાધિદૈવતમ્ । એવમેતત્
ત્રયોદશવિધસ્ય કરણસ્યાધ્યાત્મમધિભૂતમધિદૈવતં વ્યાખ્યાતમ્ ।
તત્ત્વાનિ યો વેદયતે યથાવદ્
ગુણસ્વરૂપાણ્યધિદૈવતં ચ ।
વિમુક્તપાપ્મા ગતદોષસઙ્ઘો
ગુણાંસ્તુ ભુઙ્ક્તે ન ગુણૈઃ સ ભજ્યતે ॥

અથ કાસ્તાઃ પઞ્ચાભિબુદ્ધય ઉચ્યતે । વ્યવસાયોઽભિમાનેચ્છા
કર્તવ્યતા ક્રિયેતિ । અભિમુખી બુદ્ધિરિદં કરણીયં મયેતિ વ્યવસાયો
બુદ્ધિક્રિયા । આત્મપરાત્મસ્વરૂપપ્રત્યયાભિમુખોઽભિમાનોઽહંકારો
બુદ્ધેઃ ક્રિયા । ઇચ્છા વાઞ્છા સઙ્કલ્પો મનસો બુદ્ધિક્રિયા ।
શબ્દાદિવિષયાલોચનશ્રવણાદિલક્ષણકર્તવ્યતા બુદ્ધીન્દ્રિયાણાં
બુદ્ધિક્રિયા । વચનાદિલક્ષણબુદ્ધિક્રિયા કર્મેન્દ્રિયાણાં સા ક્રિયેતિ ।
એવમેતાઃ પઞ્ચાભિબુદ્ધયો વ્યાખ્યાતાઃ ।
અથ કાસ્તાઃ પઞ્ચકર્મયોનય ઉચ્યન્તે । ધૃતિઃ શ્રદ્ધા સુખાઽવિવિદિષા
વિવિદિષા ચ પઞ્ચકર્મયોનયઃ ।
બાહ્યકર્માણિ સંકલ્પ્ય પ્રતીતં યોઽભિરક્ષતિ ।
તન્નિષ્ઠસ્તત્પ્રતિષ્ઠશ્ચ ધૃતેરેતદ્ધિ લક્ષણમ્ ॥

સ્વાધ્યાયો બ્રહ્મચર્યં ચ યજનં યાજનં તપઃ ।
દાનં પ્રતિગ્રહો હોમઃ શ્રદ્ધાયા લક્ષણં સ્મૃતમ્ ॥

સુખાર્થં યસ્તુ સેવેત બ્રહ્મકર્મતપાંસિ ચ ।
પ્રાયશ્ચિત્તપરો નિત્યં સુખેયં પરિકીર્તિતા ॥

વિષયમધુમિશ્રિતાન્તઃકારણત્વમવિવિદિષા । વિવિદિષા ચ ધ્યાનિનાં
પ્રજ્ઞાનયોનિઃ ।

એકત્વં ચ પૃથક્ત્વં ચ નિત્યં ચૈવમચેતનમ્ ।
સૂક્ષ્મં સત્કાર્યમક્ષોભ્યં જ્ઞેયા વિવિદિષા ચ સા ॥

કાર્યકારણક્ષયકરી વિવિદિષા પ્રાકૃતિકી વૃત્તિઃ । ધૃતિઃ શ્રદ્ધા
સુખાઽવિવિદિષા ચતસ્રો બન્ધાય વિદિષૈકા મોક્ષાય । એવમેતા પઞ્ચ
કર્મયોનયો વ્યાખ્યાતાઃ ।
અત્રાહ કે પઞ્ચવાયવ ઉચ્યન્તે ।
પ્રાણોપાનઃ સમાનશ્ચ ઉદાનો વ્યાન એવ ચ ।
ઇત્યેતે વાયવઃ પઞ્ચ શરીરેષુ શરીરિણામ્ ।
તત્ર પ્રાણો નામ વાયુર્મુખનાસિકાધિષ્ઠાતા પ્રણયનાત્પ્રક્રમણાચ્ચ પ્રાણ
ઇત્યભિધીયતે । અપાનો નામ વાયુર્નાભ્યધિષ્ઠિતાપનયનાદધોગમનાચ્ચાપાન
ઇત્યભિધીયતે । સમાનો નામ વાયુર્હૃદધિષ્ઠાતા સમનયનાત્
સઙ્ગમનાચ્ચ સમાન ઇત્યભિધીયતે । ઉદાનો નામ વાયુઃ કણ્ઠાધિષ્ઠાતા
ઊર્ધ્વગમનાદુત્ક્રમણાચ્ચોદાન ઇત્યભિધીયતે । વ્યાનો નામ વાયુઃ
સન્ધ્યધિષ્ઠાતા વિક્ષેપણાદ્વિજૃમ્ભણાચ્ચ વ્યાન ઇત્યભિધીયતે । ઇતિ
પઞ્ચવાયવો વ્યાખ્યાતાઃ ।
અત્રાહ કે તે પઞ્ચકર્માત્માન ઇત્યુચ્યતે । વૈકારિકસ્તૈજસો ભૂતાદિઃ સાનુમાનો
નિરનુમાનશ્ચ । તત્ર વૈકારિકઃ શુભકર્મકર્તા । તૈજસોઽશુભકર્મકર્તા ।
ભૂતાદિર્મૂઢકર્મકર્તા । સાનુમાનઃ શુભમૂઢકર્મકર્તા ।
નિરનુમાનોઽશુભમૂઢકર્મકર્તા ચૈવં પઞ્ચકર્માત્માનો વ્યાખ્યાતાઃ ।
અત્રાહ કા સા પઞ્ચપર્વાઽવિદ્યેત્યુચ્યતે । તમો મોહો
મહામોહસ્તામિસ્રોઽન્ધતમિસ્રશ્ચેતિ । તત્ર તમોમોહાવુભાવષ્ટાત્મકૌ ।
મહામોહો દશાત્મકઃ । તામિસ્રોન્ધતામિસ્રશ્ચાષ્ટાદશાત્મકૌ । તમો નામાષ્ટસુ
પ્રકૃતિષ્વવ્યક્તબુદ્ધ્યહંકારપઞ્ચતન્માત્રસંજ્ઞિતાસ્વનાત્મસ્વાત્માભિમાનસ્તમ
ઇત્યભિધીયતે । મોહો નામાણિમાદ્યષ્ટૈશ્વર્યપ્રાપ્તયે યોઽભિમાન
ઉત્પદ્યતે સ મોહ ઇત્યભિધીયતે । મહામોહો નામ દૃષ્ટાનુશ્રવિકેષુ
શબ્દાદિવિષયેષુ દશસુ વૃત્તિષુ મુક્તોહમિતિ મન્યતે સ મહામોહ
ઇત્યભિધીયતે । તામિસ્રો નામાષ્ટગુણૈશ્વર્યેઽણિમાદ્યે દશવિધે ચ વિષયે
યો દ્વેષોઽપ્રતિહતસ્તત્ર યદ્ દુઃખમુત્પદ્યતેઽસૌ તામિસ્ર ઇત્યભિધીયતે ।
અન્ધતામિસ્રો નામાષ્ટગુણૈશ્વર્યેઽણિમાદ્યે દશવિધે ચ વિષયે સિદ્ધે
મરણકાલે યો વિષાદ ઉત્પદ્યતે સોઽન્ધતામિસ્ર ઇત્યભિધીયતે । એવમેષા
પઞ્ચપર્વાઽવિદ્યા દ્વિષષ્ટિભેદા વ્યાખ્યાતાઃ ।

અત્રાહ કા સાઽષ્ટાવિંશતિધાઽશક્તિરત્રોચ્યતે । એકાદશેન્દ્રિયવધાઃ
સપ્તદશ તુષ્ટિસિદ્ધિ(બુદ્ધિ)વધાઃ । એષાષ્ટાવિંશતિધાઽશક્તિરિતિ ।
તત્રેન્દ્રિયવધાસ્તાવદુચ્યન્તે । શ્રોત્રે બાધિર્યં જિહ્વાયાં જડત્વં ત્વચિ
કુષ્ઠિત્વં ચક્ષુષ્યરૂપત્વં નાસિકાયામઘ્રાણત્વં વાચિ મૂકત્વં હસ્તયોઃ
કુણિત્વં પાદયોઃ પઙ્ગુત્વં વાગિન્દ્રિય ઉદાવર્ત ઉપસ્થેન્દ્રિયે ક્લૈબ્યં
મનસ્યુન્માદ ઇત્યેકાદશેન્દ્રિયવધાઃ । સપ્તદશતુષ્ટિસિદ્ધિવધા
નામ વિપર્યયાસ્તુષ્ટિસિદ્ધીનામ્ । તુષ્ટિવિપર્યયાસ્તાવદુચ્યન્તે ।
તત્ર નાસ્તિ પ્રધાનમિતિ યા પ્રતિપત્તિરનન્તા । એવમહમિત્યાત્મજ્ઞાને
તામસલીના તથાહંકારસ્યાદર્શનમવિદ્યા । નૈવ સન્તિ તન્માત્રાણિ
ભૂતકારણાનીત્યવૃષ્ટિઃ । વિષયાણામર્જને પ્રવૃત્તિરસુતારા ।
રક્ષણે તુ પ્રવૃત્તિરસુપારા ચ । ક્ષયદોષમદૃષ્ટ્વાઽર્થે
પ્રવૃત્તિરસુનેત્રા । ભોગા શક્તિરસુમરીચિકા । હિંસાદોષમપશ્યતો
ભોગારમ્ભોઽનુત્તમામ્ભસિકા । ઇતિ તુષ્ટિવિપર્યયા નવધાઽતુષ્ટયો
વ્યાખ્યાતાઃ । અથ સિદ્ધિવિપર્યયા અસિદ્ધયોઽષ્ટૌ ચાભિધીયન્તે ।
નાનાત્વં ભૂતમાત્રસ્યૈકાત્વમાવિર્ભૂતમતારમુચ્યતે ।
શબ્દમાત્રશ્રવણાદ્વિપરીતગ્રહણમાસુતારં યથા નાનાત્વજ્ઞો
મુક્ત ઇતિ શ્રુત્વા વિપરીતં પ્રતિપન્નો નાનાત્વજ્ઞો હ્યમુક્ત ઇતિ ।
અધ્યયનશ્રવણાભિનિવિષ્ટસ્યાપિ જડત્વાદસચ્છાસ્ત્રોપહતબુદ્ધિત્વાદ્વા
પઞ્ચવિંશતિતત્ત્વજ્ઞાનસિદ્ધિર્ન ભવતિ તદાઽતારતારં તદજ્ઞાનમ્ ।
કસ્યચિદાધ્યાત્મિકેન દુઃખેનાભિભૂતસ્યાપિ સંસારેઽનુદ્વેગાદજિજ્ઞાસોર્ન
જ્ઞાનં તત્પ્રમાદમ્ । એવમપ્રમુદિતાપ્રમોદમાનયોશ્ચાન્યોન્યયોર્દ્વયમપરં
દ્રષ્ટવ્યમ્ । સુહૃદુપદિષ્ટેઽપ્યનિશ્ચયબુદ્ધેરજ્ઞાનમ્
પરસ્પરમસમ્પા । અસમ્પાવચનાદથવા પરાઙ્મુખે ગુરૌ દુર્ભાગ્યસ્ય
જ્ઞાનાસિદ્ધિસ્તદજ્ઞાનમસત્પ્રમુદિતમિતિ । એવમેતે સિદ્ધિવિપર્યયા
અસિદ્ધયોઽષ્ટૌ વ્યાખ્યાતાઃ । એવમેષાઽષ્ટવિંશતિધાઽશક્તિર્વ્યાખ્યાતા ।
અત્રાહ કા સા નવધા તુષ્ટિરત્રોચ્યતે । પ્રકૃતિં પરમાર્થત્વેન પરિકલ્પ્ય
પરિતુષ્ટે માધ્યસ્થં લભતે તસ્ય તુષ્ટ્યા સા તાન્ત્રિકી સંજ્ઞાઽમ્ભ ઇતિ ।
અપરો બુદ્ધિં પરમાર્થવેન પ્રતિપદ્ય પરિતુષ્ટસ્તસ્યાસ્તુષ્ટેઃ શલિલા
ઇતિ સંજ્ઞા । અન્યોઽહંકારં પરમાર્થત્વેનાભ્યુપગમ્ય પરિતુષ્ટસ્ત—
પગે ૧૩૪-૧૩૫ મિસ્સિન્ગ્
સઙ્ઘાતપરાર્થત્વાદિતિ પુરુષાસ્તિત્વં સિદ્ધમ્ । ભેદાનાં પરિમાણાત્
કારણમસ્ત્યવ્યક્તમિતિ પર્યાયદ્વયેન પ્રધાનસ્યાસ્તિત્વં સિદ્ધમ્ ।

હેતુમદનિત્યમિત્યેકત્વં સિદ્ધમ્ । પ્રીત્યપ્રીતિવિષાદાત્મકા ઇત્યર્થવત્ત્વં સિદ્ધમ્ । નાનાવિધૈરુપાયૈરિતિ પરાર્થત્વં સિદ્ધમ્ । ત્રિગુણમવિવેકિ વિષય ઇત્યન્યત્વં સિદ્ધમ્ । તસ્માચ્ચ વિપર્યાસાદિત્યકર્તૃત્વં સિદ્ધમ્ । પુરુષસ્ય દર્શનાર્થં કૈવલ્યાર્થં તથા પ્રધાનસ્યાપીતિ યોગસિદ્ધિઃ । પ્રાપ્તે શરીરભેદે ચરિતાર્થત્વાદિતિ વિયોગસિદ્ધિઃ । જન્મમરણકરણાનામિતિ પુરુષબહુત્વં સિદ્ધમ્ । ચક્રભ્રમિવદિતિ શેષવૃત્તિઃ સિદ્ધા ।
એતે દશમૂલિકાર્થા વ્યાખ્યાતાઃ । એતેષાં દશાનાં પ્રાગુપદિષ્ટાનાં ચ પઞ્ચાશત્પ્રત્યયાઃ । એતે ચ ષષ્ટિપદાર્થાઃ ષષ્ટિતન્ત્રમિત્યુચ્યતે ।
અત્રાહ કોઽનુગ્રહસર્ગઃ અત્રોચ્યતે । બાહ્યાન્ પઞ્ચતન્માત્રેભ્યશ્ચોત્પાદ્યાનુગ્રહસર્ગધ્યાનોત્પન્નેનાધારવર્જિતાન્ પુત્રાન્ દૃષ્ટ્વા તેભ્યસ્તન્માત્રેભ્યોઽનુગ્રહસર્ગમસૃજદ્બ્રહ્મા ।
અત્રાહ કશ્ચતુર્દશવિધો ભૂતસર્ગ ઇત્યત્રોચ્યતે । અષ્ટવિકલ્પો દૈવઃ પૈશાચો રાક્ષસો યાક્ષો ગાન્ધર્વ ઐન્દ્રઃ પ્રાજાપત્યો બ્રાહ્મ ઇત્યષ્ટૌ દેવયોનયઃ । પઞ્ચધા તિર્યગ્યોનશ્ચ પશુપક્ષિમૃગસરીસૃપસ્થાવરા ઇતિ । ગવાદિમૂષકાન્તાઃ પશવઃ । ગરુડાદિમશકાન્તાઃ પક્ષિણઃ । સિંહાદિશ◌ૃગાલાન્તાઃ મૃગાઃ । શેષાદિકીટાન્તાઃ સરીસૃપાઃ । પર્વતાદિતૃણાન્તાઃ સ્થાવરાઃ । માનુષ્યં ચૈકવિધં બ્રાહ્મણાદિચાણ્ડાલાન્તમ્ । અષ્ટવિકલ્પો દૈવસ્તિર્યગ્યોનશ્ચ પઞ્ચધા ભવતિ । માનુષ્યશ્ચૈકવિધઃ સમાસતો ભૌતિકઃ સર્ગઃ ॥

સમાસતો યે ત્રિધાઃ સર્ગાઃ તત્રાહ કસ્ત્રિવિધો ધાતુસર્ગઃ અત્રોચ્યતે સૂક્ષ્માઃ માતાપિતૃજાઃ પ્રભૂતા ઇતિ । જ્ઞાનેન્દ્રિયપઞ્ચપ્રાણબુદ્ધિમનસાં ગણઃ સૂક્ષ્મઃ । લિઙ્ગશરીરાણીત્યર્થઃ । માતાપિતૃજા ષાટ્કૌશિકાઃ તત્ર માતૃતો લોમલોહિતમાંસાનિ પિતૃતઃ સ્નાય્વસ્થિમજ્જાન ઇતિ ષટ્કો ગણઃ । પ્રભૂતાઃ પઞ્ચમહાભૂતાનિ મહાભૂતે ઘટાદીનાં નિવેશ ઇતિ ત્રિવિધો ધાતુસર્ગો વ્યાખ્યાતઃ । એતત્સંસારમણ્ડલમુક્તમ્ ॥

અત્રાહ કસ્ત્રિવિધો બન્ધ ઇત્યત્રોચ્યતે । પ્રકૃતિબન્ધો વૈકારિકબન્ધો દક્ષિણાબન્ધશ્ચેતિ । તત્ર પ્રકૃતિબન્ધો નામાષ્ટૌ પ્રકૃતયસ્તાઃ પરતેનાભિમન્યમાનસ્ય પ્રકૃતિલયઃ પ્રકૃતિબન્ધ ઇત્યુચ્યતે । તત્ર વૈકારિકબન્ધો નામ પ્રવ્રજિતાનાં લૌકિકાનાં વૈકારિકૈરિન્દ્રિયૈર્વશીકૃતાનાં શબ્દાદિવિષયે પ્રશક્તાનામજિતેન્દ્રિયાણામજ્ઞાનિનાં કામમોહિતાનાં વૈકારિકબન્ધ

ઇત્યુચ્યતે । દક્ષિણાબન્ધો નામ બ્રહ્મચારિગૃહસ્થભિક્ષુવૈખાનસાનાં કામમોહોપહતચેતસામભિમાનપૂર્વિકાં દક્ષિણાં પ્રયચ્છતાં દક્ષિણાબન્ધ ઇત્યુચ્યતે । ઇતિ ત્રિવિધો બન્ધો વ્યાખ્યાતઃ । ઉક્તં ચ ।
પ્રાકૃતેન તુ બન્ધેન તથા વૈકારિકેણ ચ ।
દક્ષિણાભિસ્તૃતીયેન બન્ધોયં ચ નિગદ્યતે ॥

અત્રાહ કસ્ત્રિવિધો મોક્ષ ઇત્યત્રોચ્યતે । જ્ઞાનોદ્રેકાદિન્દ્રિયરાગોપશમાત્ કૃત્સ્નક્ષયાચ્ચેતિ । જ્ઞાનોદ્રેકાદિન્દ્રિયરાગોપશમાત્ સ્વધર્માધર્મક્ષયો ભવતિ ધર્માધર્મક્ષયાચ્ચ કૈવલ્યમિતિ । ઉક્તં ચ ।
આદ્યો હિ મોક્ષો જ્ઞાનેન દ્વિતીયો રાગસંક્ષયાત્ ।
કૃત્સ્નક્ષયાત્ તૃતીયસ્તુ વ્યાખ્યાતં મોક્ષલક્ષણમ્ ॥

કિં ત્રિવિધં પ્રમાણમિત્યત્રોચ્યતે । દૃષ્ટમનુમાનમાપ્તવચનં ચેતિ એતત્ ત્રિવિધં પ્રમાણમ્ । દૃષ્ટં તાવદ્વ્યાખ્યાયતે યાવદિન્દ્રિયાણાં પઞ્ચેન્દ્રિયાર્થાઃ પ્રત્યક્ષા એવ દૃષ્ટમ્ । અનુમાનમ્ પ્રમાણં લિઙ્ગદર્શને જાયમાનં જ્ઞાનમ્ । યથા મેઘોદયેન વૃષ્ટિઃ સાધ્યતે બકપઙ્ક્તિભિઃ સલિલમ્ ધૂમેનાગ્નિઃ તદનુમાનમ્ । પ્રત્યક્ષેણાનુમાનેન વા યોર્થો ન સાધ્યતે સ આપ્તવચનાત્ સાધ્યતે । યથેન્દ્રો દેવાનાં રાજા ઉત્તરાઃ કુરવઃ સૌવર્ણો મેરુઃ સ્વર્ગેઽપ્સરસ ઇતિ । ત ઇન્દ્રાદયઃ પ્રત્યક્ષાનુમાનાસાધ્યાશ્ચ વસિષ્ટાદયો મુનયો વદન્તિ સન્તીન્દ્રાદયઃ આગમોપ્યસ્તિ ।
સ્વકર્મણ્યભિયુક્તો યો રાગદ્વેષવિવર્જિતઃ ।
જ્ઞાનવાન્ શીલસમ્પન્ન આપ્તો જ્ઞેયસ્તુ તાદૃશઃ ॥

એવમેતત્ ત્રિવિધં પ્રમાણમભિહિતમ્ । અત્રાહ તેન ત્રિવિધેન પ્રમાણેન કિં સાધ્યતે અત્રોચ્યતે । યથા લોકે માનેન પ્રસ્થાદિના ધાન્યાનિ મીયન્તે । તુલયા ચન્દનાદીનિ દ્રવ્યાણિ । એવમનેન તત્ત્વભાવભૂતાનિ પ્રમીયન્તે । ત્રિવિધેન દુઃખેનાભિભૂતો બ્રાહ્મણઃ કપિલમહર્ષિશરણમુપાગતઃ અત્રાહ । કિં ત્રિવિધં દુઃખમિત્યત્રોચ્યતે । આધ્યાત્મિકમાધિભૌતિકમાધિદૈવિકમિતિ । તત્રાધ્યાત્મિકં દ્વિવિધં શારીરં માનસં ચેતિ । શરીરે ભવં શારીરમ્ મનસિ ભવં માનસં ચેતિ । તત્ર શારીરં નામ વાતપિત્તશ્લેષ્મણાં વૈષમ્યાદ્યદ્દુઃખમુત્પદ્યતે જ્વરાતિસારવિસૂચિકામૂર્છાદિકં તચ્છારીરમુચ્યતે । કામક્રોધલોભમોહમદેર્ષ્યાદિકં પ્રિયવિયોગાદિકં તન્માનસમિત્યુચ્યતે । અધિભૂતેભ્યો ભવમાધિભૌતિકમ્ । માનુષપશુમૃગસરીસૃપસ્થાવરેભ્યો યદ્દુઃખમુત્પદ્યતે તદાધિભૌતિકમ્ ।

અધિદેવેભ્યો જાતમાધિદૈવિકમ્ । શીતોષ્ણવાતવર્ષાસન્નિપાતાદિનિમિત્તં યદ્દુઃખમુત્પદ્યતે તદાધિદૈવિકમ્ । અનેન ત્રિવિધેન દુઃખેનાભિભૂતસ્ય બ્રાહ્મણસ્ય જિજ્ઞાસોત્પના । જ્ઞાતુમિચ્છા જિજ્ઞાસા । યથા તૃષિતસ્ય પાનીયં પાતુમિચ્છા પિપાસા । એતત્સમાસતો નિઃશ્રેયસં જ્ઞાનમ્ । યજ્જ્ઞાત્વા પુનર્જન્મ ન સ્યાદિતિ ॥

એતન્મહર્ષેર્વિજ્ઞાનં કપિલસ્ય મહાત્મનઃ ।
યચ્છ્રુત્વા બ્રાહ્મણઃ શ્રેયઃ કૃતકૃત્યોઽભવત્ તદા ॥

સાંખ્યસૂત્રક્રમેણૈષા વ્યાખ્યાતા ક્રમદીપિકા ।
અનુષ્ટુપછન્દસા ચાત્ર જ્ઞેયં શ્લોકશતત્રયમ્ ॥

ઇતિ શ્રીતત્ત્વસમાસાખ્યા સૂત્રવૃત્તિઃ સમાપ્તા ॥

Eન્ચોદેદ્ અન્દ્ પ્રૂફ઼્ૄેઅદ્ બ્ય્ ઢવલ્ Pઅતેલ્ દ્ગ્ધવલ્૨૭૮૫ અત્ ગ્મૈલ્ૅઓમ્

---

*tattvasamAsasUtravRittiH*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*